"बभौ स भिन्दन् हृहतस्तरङ्गान्
वार्य्यर्गलाभङ्ग इव प्रवृत्तः ॥")

कलसी। इति धरणिः ॥

वारीटः, पुं, (वार्य्यां गजबन्धनभूम्यामेटतीति। इट्+कः।) हस्ती। इति शब्दमाला ॥

वारीशः, पुं, (वारीणामीशः।) समुद्रः। इति हेमचन्द्रः ४। १३६ ॥

वारुः, पुं, (वारयति रिपूनिति। वृ+णिच्+बाहुलकात् उण्।) विजयकुञ्जरः। इति हारावली। १६० ॥

वारुठः, पुं, खट्टिः। अन्तशय्या। इति त्रिकाण्डशेषः ॥

वारुणं, क्ली, (वरुणो देवतास्येति। वरुण+अण्।) जलम्। इति राजनिर्घण्टः ॥ (शतभिषानक्षत्रम्। यथा, तिथितत्त्वे।

"वारुणेन समायुक्ता मधौ कृष्णा त्रयोदशी।
गङ्गायां यदि लभ्येत सूर्य्यग्रहशतैः समा ॥"

उपपुराणविशेषः। यथा, देवीभागवते। १। ३। १५।

"वारुणं कालिकाख्यञ्च शाम्बं नन्दिकृतं शुभम्।
सौरं पाराशरप्रोक्तमादित्यं चातिविस्तरम् ॥"

पुं, भारतस्य खण्डविशेषः। यथा, विष्णुपुराणे। २। ३। ६।

"इन्द्रद्वीपस्तथा सौम्यो गन्धर्व्वस्त्वथ वारुणः ॥")

वरुणसम्बन्धिनि, त्रि। यथा,—

"पश्चिमे पुष्पदन्तश्च वारुणश्च प्रशस्यते।
उत्तरेण तु भल्लाटं सौम्यश्च शुभदं भवेत् ॥
उडुम्बरस्तथा याम्ये वारुणे पिप्पलः शुभः।
प्लक्षश्चोत्तरतो धन्यो विपरीतास्त्वसिद्धये ॥"

इति मात्स्ये २२६ अध्यायः ॥

(यथा च महाभारते। ३। १०२। १।

"समुद्रं ते समाश्रित्य वारुणं निधिमम्भसाम्।
कालेयाः संप्रवर्त्तन्ते त्रैलोक्यस्य विनाशने ॥")

वारुणकर्म्म, क्ली, (वारुणं जलसम्बन्धि कर्म्म।) जलाशयखननादि। तस्य शुभाशुभकालादि यथा,—

यम उवाच।

"सुदिने शुभनक्षत्रे चन्द्रताराबलैर्युते।
सहतुस्तु भवेद्यत्र काले तस्मिन् विधिः स्मृतः ॥
सहतौ तु शते कर्त्तुः संपूर्णस्तन्मनोरथः।
कर्कटे पुत्त्रलाभस्तु सौख्यं तु मकरे भवेत् ॥
मीने यशोऽर्थलाभस्तु कुम्भे च सुबहूदकम्।
वृषे च मिथुने वृद्धिर्वृश्चिके निर्म्मलं भवेत् ॥
पिष्टिप्रिस्तु कन्यायां तुलायां सत्यसङ्गतिः :
सिंहे मेषे धनं नाशं जलस्य कुरुते द्विज।
तथा चैतेषु लग्नेषु वारुणं कर्म्म नो दिशेत् ॥"

इति वह्निपुराणे वारुणारामप्रतिष्ठानामाध्यायः ॥

वारुणिः, पुं, (वरुणस्यापत्यं पुमान्। वरुण+इञ्।) अगस्त्यमुनिः। इति त्रिकाण्डशेषः ॥ (यथा, महाभारते। ३। १०५। १।

"समुद्रं स समासाद्य वारुणिर्भगवानृषिः।
उवाच सहितान् देवानृषींश्चैव समागतान् ॥
अहं लोकहितार्थं वै पिबामि वरुणालयम् ॥"

वशिष्ठः। यथा, महाभारते। १। ६६। ७।

"स वारुणिस्तपस्तेपे तस्मिन् भरतसत्तम!।
वने पुण्यकृतां श्रेष्ठः स्वादुमूलफलोदके ॥"

विनतापुत्त्रभेदः। यथा, महाभारते।१।६५।४०।

"तार्क्ष्यश्चारिष्टनेमिश्च तथैव गरुड़ारुणौ।
आरुणिर्वारुणिश्चैव वैनतेयाः प्रकीर्त्तिताः ॥"

भृगुः। यथा, शतपथब्राह्मणे। ११। ६। १।

"भृगुर्ह वै वारुणिः। वरुणं पितरं विद्ययातिमेने। तद्ध वरुणो विदाञ्चकार ॥")

वारुणी, स्त्री, (वरुणस्येयम्। "तस्येदम्।" ४। ३। १२०। इत्यण्। ङीप्।) सुरा। (यथा, मनौ। ११। १४७।

"अज्ञानाद्वारुणीं पीत्वा संस्कारेणैव शुध्यति।
मतिपूर्ब्बमनिर्द्देश्यं प्राणान्तिकमिति स्थितिः ॥"

मदिराधिष्ठात्री देवी। यथा, विष्णुपुराणे। १। ६। ६३।

"किमेतदिति सिद्धानां दिवि चिन्तयतां ततः।
बभूव वारुणी देवी मदाघूर्णितलोचना ॥"

"वारुणी मदिराधिष्ठात्री देवी।" इति तट्टीकायां श्रीधरस्वामी ॥ वरुणपत्नी। वारुणीवल्लभशब्ददर्शनात् ॥ यथा, महाभारते। २। ९। ६।

"यस्यामास्ते स वरुणो वारुण्या च समन्वितः।
दिव्यरत्नाम्बरधरो दिव्याभरणभूषितः ॥"

नदीविशेषः। यथा, गो॰ रामायणे।२।७०।१२।

"पूर्ब्बेण वारुणीं तीर्त्वा कुरुक्षेत्रे सरस्वतीम्।
सरांसि च प्रफुल्लानि नदीश्च विमलोदकाः ॥")

पश्चिमदिक्। इत्यमरः। १। ३। ५१ ॥ (यथा, नैषधचरिते। ४। ६०।

"वद विधुन्तुदमालि मदीरितै-
स्त्यजसि किं द्विजराजधिया विधुम्।
किमु दिवं पुनरेति यदीदृशः
पतित एष निपीय हि वारुणीम् ॥"

विद्याविशेषः। यथा, तैत्तिरीयोपनिषदि। ३ तृतीयवल्ल्याम् ६ षष्ठानुवाके। "आनन्देन जातानि जीवन्ति। आनन्दं प्रयन्त्यभिसंविशन्तीति। सैषा भार्गवी वारुणी विद्या ॥"

अश्वानां छायाविशेषः। यथा, अश्ववैद्यके। ३। १७३।

"शुद्धस्फटिकसङ्काशा सुस्निग्धा चैव वारुणी ॥")

शतभिषानक्षत्रम्। इति हेमचन्द्रः ॥ गण्डदूर्व्वा। इति मेदिनी। णे, ९८ ॥ इन्द्रवारुणी। दूर्व्वा। इति राजनिर्घण्टः ॥ शतभिषानक्षत्रयुक्तचैत्रकृष्णत्रयोदशी। यथा, स्कन्दपुराणे।

"वारुणेन समायुक्ता मधौ कृष्णा त्रयोदशी।
गङ्गायां यदि लभ्येत सूर्य्यग्रहशतैः समा ॥"

वारुणं शतभिषा।

"शनिवारसमायुक्ता सा महावारुणी स्मृता।
गङ्गायां यदि लभ्येत कोटिसूर्य्यग्रहैः समा ॥
शुभयोगसमायुक्ता शनौ शतभिषा यदि।
महामहेति विख्याता त्रिकोटिकुलमुद्धरेत् ॥"

अत्र संज्ञाविधेः सार्थकत्वाय निमित्तत्वेन माघपञ्चतिथ्युल्लेखानन्तरं महावारुणीमहामहावारुण्यावुल्लेखनीये। तेन चैत्रे मासि कृष्णपक्षे त्रयोदश्यां तिथौ महावारुण्यां महामहावारुण्यां यथायथं प्रयोज्यम्। न चात्र।

"स्नानं कुर्व्वन्ति या नार्य्यश्चन्द्रे शतभिषां गते।
सप्तजन्म भवेयुस्ता दुर्भगा विधवा ध्रुवम् ॥"

इति ॥

"त्रयोदश्यां तृतीयायां दशम्याञ्च विशेषतः।
शूद्रविट्क्षत्त्रियाः स्नानं नाचरेयुः कथञ्चन ॥"

इति प्रचेतोजाबालिवचनाभ्यां स्त्रीणां शूद्रादीनाञ्च स्नाननिषेध इति वाच्यम्।

"भोगाय क्रियते यत्तु स्नानं याहच्छिकं नरैः।
तन्निषिद्धं दशम्यादौ नित्यनैमित्तिके न तु ॥"

इति हेमाद्रिधृतवचनेन रागप्राप्तस्नान एव निषेधात् नक्षत्रेऽपि तथा कल्पनात्। अत्र त्रयोदश्यां पूर्णायां पूर्ब्बाह्णेतरकाले नक्षत्रादिसत्त्वे परदिने पूर्ब्बाह्णे तिथिनक्षत्रलाभेऽपि पूर्ब्बदिन एव स्नानम्। रात्रावपि वारुण्यादिषु गङ्गायां स्नानम्।

"दिवा रात्रौ च सन्ध्यायां गङ्गायाञ्च प्रसङ्गतः।
स्नात्वाश्वमेधजं पुण्यं गृहेऽप्युद्धृततज्जलैः ॥"

इति ब्रह्माण्डपुराणे सामान्यतः प्रतिप्रसवात्। इति तिथ्यादितत्त्वम् ॥ * ॥ वरुणप्रेरितवृन्दावनस्थकदम्बतरुकोटरनिःसृतबलदेवपीतवारुणी। यथा,—

पराशर उवाच।

"वने विचरतस्तस्य सह गोपैर्महात्मनः।
मानुषच्छद्मरूपस्य शेषस्य धरणीधृतः ॥
निष्पादितोरुकार्य्यस्य कार्य्येणोर्व्वीविचारिणः।
उपभोगार्थमत्यर्थं वरुणः प्राह वारुणीम् ॥
अभीष्टा सर्व्वदा यस्य मदिरे त्वं महौजसः।
अनन्तस्योपभोगाय तस्य गच्छ मुदे शुभे ॥
इत्युक्ता वारुणी तेन सन्निधानमथाकरोत्।
वृन्दावनवनोत्पन्नकदम्बतरुकोटरे ॥
विचरन् बलदेवोऽपि मदिरागन्धमुत्तमम्।
आघ्राय मदिरातर्षमवापाथ पुरातनम् ॥
ततः कदम्बात् सहसा मद्यधारां स लाङ्गली।
पतन्तीं वीक्ष्य मैत्रेय प्रययौ परमां मुदम् ॥
पपौ च गोपगोपीभिः समवेतो मुदान्वितः।
उपगीयमानो ललितं गीतवाद्यविशारदैः ॥"

इति विष्णुपुराणे ५ अंशे २५ अध्यायः ॥

वारुणीवल्लभः, पुं, (वारुण्या वल्लभः। वारुणीवल्लभा यस्येति वा।) वरुणः। इति शब्दमाला ॥

वारुण्डः, पुं, फणिनां राजा। इति मेदिनी। डे, ३३ ॥ तन्मते पवर्गीयादिः। किन्तु वृधातोः उण्डप्रत्ययनिष्पन्नत्वात् अन्तःस्थादौ लिखितः ॥

वारुण्डः, पुं क्ली, (वृ+उण्डः।) नौसेकपात्रम्। नेत्रमलम्। कर्णमलम्। इति मेदिनी। डे, ३३ ॥